

மதுராந்தகம் ஸ்ரீ ஏரிகாத்த கோதண்டராமர்



தங்கமண்டபத்துடன் ஸ்ரீ அழகியசிங்கனும் ஸ்ரீமத் அழகியசிங்கரும்

श्रीमते श्रीलक्ष्मीनृसिंहपरब्रह्मणे नमः
श्रीमते श्रीमदादिवणशठकोप यतीन्द्रमहादेशिकाय नमः
श्रीमते श्रीवणशठकोप श्री रङ्गनाथयतीन्द्र महादेशिकाय नमः

# प्रवालवर्षिका


# PRAVAALA VARSHIKAA

## PLATINUM JUBILEE OF SRI AHOBILA MUTT VEDA PRABANDHA SASTRA ADARSHA SAMSKRUTA MAHAVIDYALAYA, MADURANTAKAM – 603 306

Publisher :

Dr. D.P.Kannan

Hony. Secretary ,
Sri Ahobila Mutt
Adarsha Samskruta
Mahavidyayalaya, Trustee
Sri Malolan Educational Trust



General Editor :

Dr.S.Varadagopalakrishnan,

Principal, Sri Ahobiia Mutt
Adarsha Samskruta Mahavidyayalaya

Editors

Sri S.Sudarsanan, Assistant Professor in Nyaya

Sri M.S.Srikanth, Assistant Professor in V.Vedanta

## PLATINUM JUBILEE SOUVENIR (1942 – 2017)

**Sri Ahobilamutt Adarsha Samskruta Mahavidyalaya**
**Madurantakam – 603 306**



First session of the National Seminar
Chairperson Brahma
Sri. Manidravid



Second session of the National Seminar
Chairperson
Villur Sri. U.Ve. Karunakarachar Swamy




Third session of the National Seminar
Chairperson
Sri.U.Ve. N.V.Vasudevachar Swamy



Fourth session of the National Seminar
Chairperson Sri.U.Ve. Mannargudi
Rajagopalachar Swamy




Sri.U.Ve. Dr. T.S.R. Narayanachar
from RSVP Tirupathi
presenting a paper in the first session.



Our Honourable Secretary
Sri. U.Ve. Dr. D.P. Kannan Swamy
honoured by Sri. Mannargudi Swamy.

# गुरुकुलपद्धत्या वेदाध्ययनस्य माहात्म्यम्

**Vedavaridhi: Sogathur**

**Dr. Sri U.Ve.P.Ramanujachariar Swamy,**

Asthana Vidvan, Sri Ahobila Math

आविष्णोरभिवन्द्यादावाचार्याणां परम्पराम् ।
वेदाचार्यांश्च मे तातान् पराङ्कुशसदाह्वयान् ॥

वात्स्यरामानुजार्येण तैत्तिरीयमधीयता ।
वेदाध्यायस्य माहात्म्यमाचार्यकुलपद्धतौ ॥

वेदाध्ययनसक्तानां छात्राणां बोधनाय हि ।
विविच्यते यथाशक्ति तेन तुष्यन्तु सज्जनाः ॥

## उपोद्घातः

वेदेषु गुरु-शिष्य शब्दयोः स्थाने आचार्यान्तेवासिनौ इति शब्दौ प्रयुज्येते । 'नैवं विदुषाचार्यान्तेवासिनौ । अन्योन्यस्मै द्रुह्याताम्', 'आचार्यवान् पुरुषो वेद', 'आचार्यदेवो भव', 'देवमिव ह्याचार्यमुपासीत' इत्यादिषु । ब्रह्मन्, भगवः इत्यादि शब्दाश्च आचार्ये श्रुताः । शिष्यशब्दस्तु न श्रूयते एव । 'तस्मै मा ब्रूयानिधिपाय ब्रह्मन्' इति विद्यासूक्ते अन्तेवासिनः धर्मा उक्ताः । अधिविद्यप्रकरणे तैत्तिरीयोपनिषदि च 'आचार्यः पूर्वरूपम् । अन्तेवास्युत्तररूपम् । विद्या सन्धिः । प्रवचनँ सन्धानमि'त्युक्तम् । 'वस ब्रह्मचर्यं', 'ब्रह्मचर्यमुवास', 'ब्रह्मचर्यं वसन्तं निरभजत्' इत्यादिषु वेदाध्ययनस्यापि ब्रह्मचर्यमाचार्यकुले वासः इत्येव नाम श्रूयते । 'आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य' इत्यादि छान्दोग्ये निगमने दृश्यते । ऋणत्रयापाकरणप्रसंगे च 'ब्रह्मचर्येण ऋषिभ्यः' इति चोदितम् ।

'ये के चास्मच्छ्रेयाँसो ब्राह्मणाः, तेषां त्वयाऽऽसनेन प्रश्वसितव्यम्' इत्यादिविधिभिः अन्तेवसता ब्रह्मचारिणा न केवलम् आचार्येण यदध्यापितं तावदेव, अपितु यद्यन्निमिषितम्, इङ्गितं, चेष्टितं, भाषितम्, आचरितम्, विचारितम्, स्वस्माच्छ्रेयोभिः, सदृग्भिः, पापीयोभिश्च यद्यद्व्यवह्रियते तत्सर्वं ज्ञापकं भवति । प्रत्यक्षानुमानश्रुतिभिः अनुभवेन च बहु ज्ञायते पठ्यक्रमेण कालनियमेन च अनभिभूतम् । वाल्मीकेः नारदेन सह सम्भाषणादौ तच्छिष्यैः भारद्वाजादिभिः एतदनुभूतम् । अत एवोक्तं महाकविना –'सारं तु सारस्वतं जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः' इति, अब्धेः गम्भीरताम् उपरि लङ्घितवद्भिः वानरभटैः न ज्ञायते, अपितु आपातालनिमग्नपीवरतनुः मन्थाचल एव जानातीति दृष्टान्तयता । अतः देव्या वाच उपासनात् तत्प्रसादादधिगमादपि गुरुकुलवासस्य श्रैष्ठ्यम् उद्घाट्यते ।

## पारम्परिकस्थितिः

प्राचीनकालादारभ्य अनारतम् अविगानेन शिष्टैः सर्वैरप्याद्रियमाणः गुरुकुलवास एव साधिष्ठः । 'आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापदि'ति च भगवती श्रुतिः । 'स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमि'ति आचार्योपसदनं विद्यार्थिनः विधीयते ।

'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।

तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः' इति आचार्ये वृत्तिश्च शिष्टा । तत्र 'उपनयनं विद्यार्थस्य श्रुतितः सँस्कारः' इत्यापस्तम्बः । 'अभिजनविद्यासमुदेतं समाहितं संस्कर्तारमीप्सेत्', 'शरीरमेव मातापितरौ जनयतः । स हि विद्यातस्तं जनयति । तच्छ्रेष्ठं जन्म' इति च । मनुरपि

'उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः ।

सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते' इति आचार्यशब्दं निर्वक्ति ।

## आधुनिकस्थितिः

तस्यैतस्य वेदाध्ययनस्य अद्यत्वे सन्ति बहुधा ग्रहणप्रकाराः, परन्तु सर्वे न विधिचोदिताः । स्थालीपुलाकवत् तत्रतत्र स्थितानां कतिपयभागानाम् अधिकारविचारमन्तरा अन्तर्जाले, महाविद्यालयेषु, पाठशालासु, विश्वविद्यालयेषु, पाश्चात्यदेशेषु, अप्राय-त्यादिदुष्टं, विनाऽनुष्ठानं, अनध्यायनियमादिरहितं, स्यूतवासस्त्व, सोपानत्कत्व, मञ्चोपरिष्ठत्व, पादोपरिप्रसृतपादान्तरवत्त्वादि-दोषयुक्तं, लौकिकविद्यया सार्धम् अप्राधान्येन, प्राधान्येन वा,

लिखित, पत्रेक्षित, ध्वनिमुद्रित, मानसगुरुद्वारा विजिगीषु/जिज्ञासु प्रश्नादिद्वारा वा, संगोष्ठीषु, चर्चासत्रेषु, सम्मेलनेषु च ज्ञानम् इत्यादयः प्रकाराभासाः दरीदृश्यन्ते । अन्यथाकृतमकृतमिति न्यायेन एते न फलदायकाः । प्रणामाभिवादनादिहीनं '.. छन्नेनाथ च्छलेन वा । पत्रेक्षितो वा व्यर्थः स्यात्, प्रत्युतानर्थदो भवेत्' इत्युक्तत्वात् ।उत्तमे वयसि यथाकथञ्चित् आत्मतृप्तये परोपकाराय धनार्जनाय वाऽपि अध्येतारः दरीदृश्यन्ते ।

## आर्षेयक्रमः

'श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि । युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान्' इति, 'अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत् । वेदाङ्गानि यथान्यायं कृष्णपक्षेषु संपठेदि'ति च विधानात् संवत्सरे श्रावण्याः पौर्णमास्याः अनन्तरभूत शुक्लपक्ष-मारभ्य पञ्चसु शुक्लपक्षेष्वेव केवलं वेदाध्ययनं करणीयम् । वेदानामुपाकरणवत् तैष्यां पौर्णमास्याम् उत्सर्जनस्यापि विधानात् । अतः अङ्गानाम् अध्ययनं संवत्सरे अवशिष्टेषु एकोनविंशतिपक्षेषु क्रियेत । अतः एतत्सर्वमभिप्रेत्य अध्ययनलक्षणमेवमभाषि श्रीमद्भिः भाष्यकारैः जिज्ञासाधिकरणे 'स्वाध्यायोऽध्येतव्यः' इति विधेः 'सत्सन्तानप्रसूत-सदाचारनिष्ठ-आत्मगुणोपेत-वेदविदा-चार्योपनीतस्य व्रतनियमविशेषयुक्तस्य गुरुमुखोच्चारणानूच्चारणपूर्वकम् अक्षरराशिग्रहणफलम् अध्ययनमित्यवगम्यते' इति ।

आचारविषये च–'वातरशना ह वा ऋषयः श्रमणा ऊर्ध्वमन्थिनो बभूवुः', 'यामृषयो मन्त्रकृतो मनीषिणः, अन्वैच्छन्देवास्तपसा श्रमेण, तान्देवीं वाचं', 'तस्मिन्नियमविशेषाः', 'धर्मं चरे'ति बहुत्र आचारस्य विधानात्, 'ब्रह्मचर्येण तपसैव देवाः' इति यज्ञस्य प्रसृत्यै विहितत्वाच्च, 'नियमेषु तपःशब्दः' इत्यापस्तम्बोक्तेः, 'आचारहीनं न पुनन्ति वेदाः यद्यप्यधीताः सह षड्भिरङ्गैः । छन्दांस्येनं मृत्युकाले त्यजन्ति नीडं शकुन्ता इव जातपक्षाः', 'आचारः प्रथमो धर्मो धर्मस्य प्रभुरच्युतः', 'यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नं', 'उपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय' इत्याद्यात्मगुणपूर्तिश्च विहिता । 'येषां त्रीण्यपदानानि योनिर्विद्या च कर्म चे'त्याचारप्रशंसा कृता ।

## सारस्वतपाठक्रमः

तैत्तिरीये तु अद्यत्वे सारस्वतपाठक्रमः (यत्र संहितायां सप्त काण्डानि, चतुश्चत्वारिंशत् प्रश्नाः, ब्राह्मणे अष्टकत्रयमित्यादि भवति) प्रचारे वर्तते । अथापि आर्षेयक्रमस्य महर्षिणा

बौधायनेन काण्डविभजनपुरःसरं प्रतिपादितत्वात्, 'यथा सारस्वते पाठे ज्ञानमात्र-मिहेष्यत' इत्युक्तत्वाच्च, काण्डानुक्रमणिकानुसारं विभक्तस्य वेदराशेः ज्ञानं, तदनुसारि व्रतसमावर्तनादीनां स्पष्टकल्पनं च अवश्या-पेक्षितम् । तत्तत्काण्डाध्ययनात् पूर्वं तस्य व्रताचरणं, तत्काण्डाध्ययनसमाप्तौ तत्समावर्तनमिति प्राजापत्य, आग्नेय, सौम्य, वैश्वदेव, स्वायम्भुव काण्डानां प्राचीनकाले भवति स्मेति ज्ञायते । ब्रह्मयज्ञविधौ ऋषीणां तर्पणं वेदस्य स्वाध्यायात्पूर्वं क्रियमाणं तैत्तिरीयाणां प्रतिमन्त्रं (यजुः) ऋषि च्छन्दोदैवत विनियोगोक्त्यभावात् काण्डर्षितर्पणरूपं भवति ।

## अध्ययनत्रैविध्यम्

तस्यैतस्य ऋग्यजुःसामाथर्वाख्य चतुर्वेदात्मकस्य स्वाध्यायस्य षट् अङ्गानि विहितानि –'शिक्षा व्याकरणं छन्दो निरुक्तं ज्यौतिषं तथा । कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः' इति, तत्तद्वेदाङ्गस्य वेदार्थविशदीकरणे विधीयमानोपकारविशेषानुगुणं घ्राण, मुख, पाद, श्रोत्र, चक्षु,र्हस्तरूपाङ्गसादृश्यं च आकरेषु लभ्यते । एषु शिक्षा-छन्दसोः वर्णस्वरूपज्ञानं रक्षणं च, व्याकरण-निरुक्तयोः शब्दार्थज्ञानं रक्षणं च, ज्यौतिष-कल्पयोः प्रायोगिक विनियोगतः अनुष्ठानज्ञानं रक्षणं च औचित्येन यथायथं वेदितव्यः ।

एतादृशवेदानां स्वाध्यायस्तावत् मूलानुपूर्व्यां संहिता, ब्राह्मण, आरण्यक, उपनिषद्रूपेण, पदपाठ, क्रमपाठ, विकृत्यादिभिश्च, सलक्षणं, साङ्गं, सभाष्यं च अधीतः सन् महते श्रेयसे कल्पते । 'योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा', 'ऋचो अक्षरे परमे व्योमन् यस्मिन्देवा अधि विश्वे निषेदुः । यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते', 'लक्षणज्ञस्तदाप्नोति', 'अङ्गं च वर्णसारं च पञ्च वर्णक्रमाः स्मृताः ।उत्तमो लक्षणज्ञानी लक्ष्यज्ञानी तु मध्यमः ।', 'लक्षणं यो न वेत्त्यृक्षु न तस्य फलभाग्भवेत् ।लक्षणज्ञो हि विप्राणां सकलं भद्रमश्नुते ।' इति कौण्डिन्यशिक्षायां, 'वेदा हि यज्ञार्थमभिप्रवृत्ताः', 'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्', 'यज्ञो हि श्रेष्ठतमं कर्मे'ति आतिशायनिकप्रत्ययद्वयनिर्देशेन यज्ञादीनां साक्षादनुष्ठानस्य, विनाऽपि तत्, सुसूक्ष्मतया तज्ज्ञानस्य च फलसाम्यं, 'य एवं वेद', 'य उ चैनमेवं वेद', 'य एवं विद्वान्', इत्यादिषु अन्वयव्यतिरेकमुखेन प्रतिपादितत्वात् पूर्वोक्तांशत्रितयमवश्यापेक्षितमिति गम्यते ।

## लक्षणाध्ययनम्

प्रतिवेदं विभिन्नाः शिक्षाग्रन्थाः, प्रातिशाख्यम्, संहितातः पदपाठे संभाव्यमान बहुविध सन्देहनिरासाद्यर्थं सप्तलक्षणानि, लक्षणत्रय विषयेऽपि संभावनीयाक्षेपाः, तत्परिहाराः,

वेदाध्ययनसर्वस्वं, सप्तलक्षणभूषणं, वेदलक्षणसिद्धाञ्जनम्, इत्यादयो ग्रन्थाः, विकृतिपाठेषु सन्ध्यादिज्ञापकाः प्रकरणग्रन्थाः, बैट् ग्रन्थाः, विविधाः अनुक्रमणिकादयः, वर्णक्रमदर्पणादयश्च अध्येयाः ।

## अङ्गाध्ययनम्

षण्णामपि वेदाङ्गानां अध्ययनं वेदार्थविशदज्ञानाय आवश्यकम् । तत्र शिक्षायां वर्णोच्चारणादिविधयः, प्रकृतिप्रत्ययविभागेन साध्वसाधु शब्दज्ञानप्रयोगादयः व्याकरणे, वेदमन्त्राणां छन्दोविशेषाः यज्ञोपयुक्त प्रस्तारादयश्च छन्दसि, वैदिकशब्दानां धातुभ्यः, निघण्टोः, उपबृंह णादिभिश्च निर्वचनज्ञानं निरुक्ते, यज्ञार्थकालादिज्ञानं ज्यौतिषे, यज्ञान्तर्गतसमस्तकार्यकलापविस्तारज्ञानं कल्पे च विवृताः इति हेतोः तेषामध्ययनं बहुफलप्रदम् अतः आवश्यकं च ।

## भाष्याध्ययनम्

अनुबन्धचतुष्टयेन साकं विशदं वेदमन्त्रादीनां तात्पर्यावगतिः भाष्यादेव भवति । 'व्याख्यानतो विशेषप्रतिपत्तिरि'त्युक्तत्वात् । तत्र हि शिक्षादि षडङ्गेभ्योऽप्यतिरिच्य उपाङ्गभूत न्याय, मीमांसादिशास्त्रसाहाय्येन अर्थनिर्णयः क्रियते । 'धर्मे प्रमीयमाणे हि वेदेन करणात्मना । इतिकर्तव्यताभागं मीमांसा पूरयिष्यती'त्युक्तेः । 'यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम् । तावुभौ पुण्यकर्माणौ पङ्क्तिपावनपावनौ' इति सूक्तेश्च । भट्टभास्कर, सायणादि भाष्यकाराः ईदृशं परमोपकारमातन्वते ।

## आधुनिकपरिकरसौकर्यकल्पनम्

अतः आधुनिक सूचनाप्रौद्योगिक, दूरसम्पर्कादि सौविध्यादिकमुपयुज्य तदीय वेग, मेधादि ग्राह्यांशस्वीकारेण ज्ञानानुष्ठान-वर्धनोपयोगि प्रणाळयः कल्पनीयाः, याभ्यः स्तरत्रयेऽपि साङ्गोपाङ्ग चतुर्दशविद्यास्थानानां सम्यगवगतिः अध्ययनाध्यापन संशोधनानुसन्धानादि कार्यं च सम्यक् प्रचलेत् । विरुद्धवत्प्रतीयमानयोः वैदिकलौकिकयोः अन्यतरस्य हानमपि नावश्यकं स्यात् ।

सर्वासु भारतीयलिपिषु टङ्कन, प्रदर्शन, मुद्रण, लिप्यन्तरण, जालपुट, अन्तर्जालादिद्वारा विषयाणां प्रेषणाद्यर्थं, तत्र च पठन, अन्वेषण, सूच्यादिनिर्माण, सूत्रोक्तनियमावल्यनुसारेण विश्लेषण, संबद्धग्रन्थानां आकराणां च निर्देश, तालपत्र, हस्तप्रति, पाण्डुलिप्यादीनां विमर्शाद्यर्थं सौकर्यं परिकल्पितमस्ति । बहूनामाकरग्रन्थानाम् उपस्थापनम् अन्तर्जाले आरोपणं च कृतमस्ति । वेदवाङ्मयस्य सस्वरस्य गवेषणे अतीव उपयुक्तः संग्रहः

सर्वेषां निःशुल्कं सुलभोऽस्ति । ईदृशकार्यार्थमपेक्षित मानकविकामादारभ्य ग्रन्थसंपादनं, तत्र शास्त्रीयप्रमेयानुगुण विशेषद्योतनाय गवेषणसौकर्याय च अपेक्षिता अनेके अंशाः विकसिताः, सकलशास्त्र-सूत्रकोशः निर्मितः, शाब्दबोधादिक्रमेण वाक्यादिविश्लेषणं, वैदिकवाङ्मये स्वरादीनां विश्लेषणं, सन्धि, समासादि प्रक्रियाः, तासां सोपानक्रमेण विवरणं, विशिष्ट, अमुद्रित तालपत्राणां संग्रह, प्रतिलेखन, तोलन, मुद्रणाद्यर्थं च सौकर्यकल्पनं विहितमस्ति । वरिष्ठानां वृद्धानां विदुषां उपन्यासादयः, प्रश्नोत्तर्यादयः, वाक्यार्थ सदआदयः च जिज्ञासूनां व्युत्पित्सूनां च कृते निर्मिताः । एभिः अन्तर्जालाधारित निःशुल्क वेद, संस्कृत, तालपत्रादि विषयक पाठाः संसाधनानि च उपलभ्यन्ते ।

## शक्यसंभावनाः प्रकल्पाः

ईदृशसर्वोपकरणानां सम्यगुपयोगेन छात्राणां लक्षण, अङ्ग, भाष्यादिभिः साकं पुराण, न्याय, मीमांसा, धर्मशास्त्र, वेदाङ्ग मिश्रित वेदचतुष्टयरूप चतुर्दश विद्यास्थानेषु अधीति, बोध, आचरण, प्रचारणैः चतस्रः दशाः प्रणेयाः सन्ति । आदर्शविद्यार्थिभिः न केवलं शास्त्रीयं श्रवणादिना ज्ञानासादनम् अपि तु प्रायोगिक कौशलमपि वर्धयितुं संशोधन, अनुसन्धानादि च कर्तुं सौकर्यमस्ति ।

## निगमनम्

प्रातःस्मरणीयानां मम पितृचरणानां 'पित्रे ब्रह्मोपदेष्ट्रे मे गुरवे दैवताय च प्राप्याय प्रापकाय' इति सर्वविधबन्धूनां सकाशादधीतस्य त्रिविधस्य स्वाध्यायस्य योग्याधिकारिणाम् अध्यापनादिद्वारा ऋषिऋणापाकरणरूपं कर्तव्यं विधातुं तेषां पुण्यस्मृतावायोजिता **पराङ्कुशाचार्य वैदिक अध्ययन संस्था** नाम्नी स्वीयान्तर्जालपुटे आर्षेयापाठसहितवेदभागस्य अन्वेषणादि सौलभ्यसहितस्य उपस्थापनेन कृतार्थीभवति ।

**यन्त्रेण शास्त्रीय मार्गस्य बोधं व्यातन्वतीयं सरणिस्तु नूत्ना।**

**वेदेषु शास्त्रेषु तालाख्य पत्रे निवेशितानां विहिता हि वित्त्यै॥**

**प्रविविक्षु जनानां च प्रविष्टानां समं मुदे ।**

**रचिता रुचिरा शैली नवाऽऽधुनिकगोचरा ॥**

वक्ता श्रोता वचनविषयः प्रीयतां वासुदेवः ॥

॥शुभमस्तु ॥

# अहोबिलमठमहिमा

**Dr. Sri U.Ve.T.S.R.Narayananachariyar Swamy**

Asst. Prof . Dept of Meemamsa

RSVP, Tirupati.

## उपोद्धातः

अयं खलु भगवान् आश्रितसंरक्षणार्थं बहूनवतारान् विधाय स्वाभीष्टं पराभीष्टं च साधयतीति सम्प्रदायविदो ब्रुवन्ति । अयं च भगवान् स्वगीतासु अवताररहस्य प्रतिपादनं स्वयमित्थं कथयति

**परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।**

**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ।।** इति ।

परन्तु प्राक्तनेषु युगेषु सत्वरजसोरेव गुणयोः प्रादुर्भावः प्रायेण आसीत् । अतः सात्विकानां स्वतो धर्म प्रवृत्तिः अभवत्। राजसगुणाभिभूतानां तु धर्मे प्रवृत्तिः भगवता विहिता तेषां निग्रहणे, शास्त्रपाणिना भगवता अधिकार्यनुगुणं प्रवृत्तिः विहिता ।

किन्तु तमो गुणातिष्ठानां स्वतो वा शास्त्रतो वा प्रवृत्तिः न सम्भवतीति शास्त्रतपाणिना भगवता श्रीमन्नारयणेन तेषां अपि प्रवृत्तिः धर्मे निर्धारिता ।

यथाहुः- **"साक्षान्नारयणो देवः कृत्वा मर्त्यमयीं तनुम् ।**

**मग्नानुद्धरते लोकान् कारुण्यात् शास्त्रपणिना।।"** इति ।

तथैवाहुः श्रीदेशिकचरणाः श्रीदयाशतके –

**"करुणे दुरितेषु मामकेषु प्रतिकारन्तरदुर्जयेषु खिन्नः ।**

**कवचायितया त्वयैव शाङ्गीं विजयस्थानमुपाश्रितो वृषाद्रिम् ।।"** इति।

अयमर्थः – शास्त्रपाणित्वं नाम आचार्यत्वम् आचार्यवेषेणैव भगवता सर्वं प्रसाधितमिति अर्थः आयाति । अत एव भगवन्तमपि गुरुत्वेन आचार्यत्वेन देशिकत्वेन च पश्यन्ति साम्प्रदायिकाः । तथा च एतेषां शब्दानां निर्वचनम् –